# Tulasi Kavacham 1

# તુલસીકવચમ્ ૧

## Document Information

Text title : tulasIkavacham 1

File name : tulasIkavacham.itx

Category : kavacha, devii, tulasI, devI, brahmANDapurANa

Location : doc_devii

Author : Traditional

Transliterated by : Sunder Hattangadi, Nat Natarajan

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : Dec. 3, 2009, March 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# Tulasi Kavacham 1

# તુલસીકવચમ્ ૧

શ્રીગણેશાય નમઃ ।
અસ્ય શ્રીતુલસીકવચસ્તોત્રમન્ત્રસ્ય શ્રીમહાદેવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીતુલસી દેવતા ।
મમ ઈપ્સિતકામનાસિદ્ધ્યર્થં જપે વિનિયોગઃ ।
તુલસી શ્રીમહાદેવિ નમઃ પઙ્કજધારિણિ ।
શિરો મે તુલસી પાતુ ભાલં પાતુ યશસ્વિની ॥ ૧॥

દૃશૌ મે પદ્મનયના શ્રીસખી શ્રવણે મમ ।
ઘ્રાણં પાતુ સુગન્ધા મે મુખં ચ સુમુખી મમ ॥ ૨॥

જિહ્વાં મે પાતુ શુભદા કણ્ઠં વિદ્યામયી મમ ।
સ્કન્ધૌ કહ્વારિણી પાતુ હૃદયં વિષ્ણુવલ્લભા ॥ ૩॥

પુણ્યદા મે પાતુ મધ્યં નાભિં સૌભાગ્યદાયિની ।
કટિં કુણ્ડલિનિં પાતુ ઊરૂ નારદવન્દિતા ॥ ૪॥

જનની જાનુની પાતુ જઙ્ઘે સકલવન્દિતા ।
નારાયણપ્રિયા પાદૌ સર્વાઙ્ગં સર્વરક્ષિણી ॥ ૫॥

સઙ્કટે વિષમે દુર્ગે ભયે વાદે મહાહવે ।
નિત્યં હિ સન્ધ્યયોઃ પાતુ તુલસી સર્વતઃ સદા ॥ ૬॥

ઇતીદં પરમં ગુહ્યં તુલસ્યાઃ કવચામૃતમ્ ।
મર્ત્યાનામમૃતાર્થાય ભીતાનામભયાય ચ ॥ ૭॥

મોક્ષાય ચ મુમુક્ષૂણાં ધ્યાયિનાં ધ્યાનયોગકૃત્ ।
વશાય વશ્યકામાનાં વિદ્યાયૈ વેદવાદિનામ્ ॥ ૮॥

દ્રવિણાય દરિદ્રાણાં પાપિનાં પાપશાન્તયે ॥ ૯॥

અન્નાય ક્ષુધિતાનાં ચ સ્વર્ગાય સ્વર્ગમિચ્છિતામ્ ।

પશવ્યં પશુકામાનાં પુત્રદં પુત્રકાઙ્ક્ષિણામ્ ॥ ૧૦॥

રાજ્યાય ભ્રષ્ટરાજ્યાનામશાન્તાનાં ચ શાન્તયે ।
ભક્ત્યર્થં વિષ્ણુભક્તાનાં વિષ્ણૌ સર્વાન્તરાત્મનિ ॥ ૧૧॥

જાપ્યં ત્રિવર્ગસિદ્ધ્યર્થં ગૃહસ્થેન વિશેષતઃ ।
ઉદ્યન્તં ચણ્ડકિરણમુપસ્થાય કૃતાઞ્જલિઃ ॥ ૧૨॥

તુલસીકાનને તિષ્ઠન્નાસીનો વા જપેદિદમ્ ।
સર્વાન્કામાનવાપ્નોતિ તથૈવ મમ સન્નિધિમ્ ॥ ૧૩॥

મમ પ્રિયકરં નિત્યં હરિભક્તિવિવર્ધનમ્ ।
યા સ્યાન્મૃતપ્રજા નારી તસ્યા અઙ્ગં પ્રમાર્જયેત્ ॥ ૧૪॥

સા પુત્રં લભતે દીર્ઘજીવિનં ચાપ્યરોગિણમ્ ।
વન્ધ્યાયા માર્જયેદઙ્ગં કુશૈર્મન્ત્રેણ સાધકઃ ॥ ૧૫॥

સાઽપિ સંવત્સરાદેવ ગર્ભં ધત્તે મનોહરમ્ ।
અશ્વત્થે રાજવશ્યાર્થી જપેદગ્નેઃ સુરૂપભાક્ ॥ ૧૬॥

પલાશમૂલે વિદ્યાર્થી તેજોઽર્થ્યભિમુખો રવેઃ ।
કન્યાર્થી ચણ્ડિકાગેહે શત્રુહત્યૈ ગૃહે મમ ॥ ૧૭॥

શ્રીકામો વિષ્ણુગેહે ચ ઉદ્યાને સ્ત્રીવશા ભવેત્ ।
કિમત્ર બહુનોક્તેન શૃણુ સૈન્યેશ તત્ત્વતઃ ॥ ૧૮॥

યં યં કામમભિધ્યાયેત્તં તં પ્રાપ્નોત્યસંશયમ્ ।
મમ ગેહગતસ્ત્વં તુ તારકસ્ય વધેચ્છયા ॥ ૧૯॥

જપન્ સ્તોત્રં ચ કવચં તુલસીગતમાનસઃ ।
મણ્ડલાત્તારકં હન્તા ભવિષ્યસિ ન સંશયઃ ॥ ૨૦॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે તુલસીમાહાત્મ્યે તુલસીકવચં સમ્પૂર્ણમ્ ॥

Encoded by Sunder Hattangadi sunedrh at hotmail.com
Proofread by Sunder Hattangadi, Nat Natarajan, NA

*Tulasi Kavacham 1*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*